16.09.20
1

## उपशास्त्री

## संज्ञाध्याय:

ग्रहाणां तात्कालिकशुभत्वाशुभत्वे श्लोकेनाह —

सर्वे त्रिकोणनेतारो ग्रहाः शुभफलप्रदाः।
पतयस्त्रिषडायानां यदि पापफलप्रदाः॥

अन्वयः — त्रिकोणनेतारः सर्वे ग्रहाः शुभफलप्रदाः भवन्ति। यदि तु सप्त एव ग्रहाः त्रिषडायानां पतयः तर्हि पापफल-प्रदाः भवन्ति।

संस्कृत - सर्वेति - त्रिकोणनेतारः पञ्चमनवमेशाः सर्वे ग्रहाः शुभाः पापाश्च शुभफलप्रदाः यदि त्रिषडायानां पतय-स्तर्हि पापफलप्रदाः। परमस्मिन्नर्थे महान्दोषः। रविचन्द्रौ विहाय सर्वे ग्रहा राशिद्वयाधिपाः। तत्रैको राशिर्विषमः द्वितीयः समः। तेन ये ग्रहाः विषमभावाधिपास्ते पुनर्वि-षमभावपतयो न भवितुमर्हन्ति किन्तु ते समभावाधिपा एव तेन त्रिकोणेशौ तृतीयलाभाधिपौ न भवितुमर्हतः केवलं षष्ठेशौ भवितुमर्हतः तेन त्रिकोणनेतारो यदि षष्ठ पतयः तदा न शुभाः इत्येव वक्तुं योग्यम् अथ वास्तविकोऽर्थः। यदि त्रिकोणनेतारः त्रिकोणस्वामिनः सर्वेग्रहाः अन्यान्तरोक्ताः शुभा वा पापाः शुभफलदाः तदा त्रिषडायानां तृतीयषष्ठैकादशानां पतयस्तु पाप-फलप्रदाः अर्थादत्र त्रिकोणेशाः शुभाः त्रिषडायेशाः पापाः त्रिकोणं शुभस्थानं त्रिषडायाः न शुभा इत्यत्र विशेषः। अत्र लग्नमपि त्रिकोणत्वेन यथावसरं वक्ष्य-माणविचाराद्ग्राह्यम्।

भैमकुरी — सभी ग्रह त्रिकोण (५ व ९ भावों) के स्वामी होकर शुभफलदायक और त्रिषडाय (३, ६ व ११ भावों) के स्वामी होकर अशुभ फलदायक होते हैं। अर्थात् - त्रिकोण स्थान शुभ और त्रिषडाय स्थान पाप फलद हैं, जो दोनो के स्वामी होते हैं, वे पाप फलद ही होते हैं।

P.T.O

द्वादशस्थितानां सर्वग्रहाणां फलान्याह—

अन्ते गुरुर्धनवतीं दिनकृद्दरिद्रां
चन्द्रो धनव्ययकरीं कुलटां च राहुः।
साध्वीं भृगुः शशिसुतो बहुपुत्रपौत्रां
पानप्रसक्तहृदयां रविजः कुजश्च॥

यदि वैवाहिक लग्न से द्वादश भाव में गुरु हो तो धनवती, सूर्य हो तो निर्धन, चन्द्र हो तो बहुत खर्च करने वाली, राहु हो तो कुलटा, शुक्र हो तो साध्वी, बुध हो तो बहुत पुत्र वाली और शनि या मंगल हो तो मद्य आदि पान करने वाली स्त्री को करता है।

अन्ते द्वादशस्थाने गुरुर्जीवो धनवतीं सधनां कन्यकां करोति। दिनकृदादित्यो दरिद्रां निर्धनाम्। चन्द्रः शशी धनव्ययकरीमर्थक्षयकरीम्। राहुः कुलटां बन्धकीम्। भृगुः शुक्रः साध्वीं सच्छीलाम्। शशिसुतो बुधो बहुपुत्रपौत्रां प्रभूतसुतां प्रभूतपौत्राम्। रविजः शनैश्चरः पानप्रसक्तहृदयां पाने प्रसक्तमनुरक्तं हृदयं यस्याः। कुजोऽङ्गारकश्चशब्दात् पानप्रसक्तहृदयामेव।

डॉ० सुदिष्ट कुमार
सह० प्राध्यापक (ज्योतिष)
रा० उ० सं० महावि० सुप्पसेना,
पूर्णियाँ।

16.09.20

2

विमर्श - त्रिकोण भावों के स्वामी सभी ग्रह सदैव शुभफल-दायक होते हैं। चाहे वह नैसर्गिक शुभ ग्रह हो, या पापग्रह। यह कहा जा सकता है कि शुभ ग्रह अतिशुभ और पापग्रह शुभद होते हैं। इसी प्रकार त्रिषडाय के स्वामी ग्रह पाप फलद होते हैं। शुभ ग्रह अशुभद और पापग्रह अतिअशुभद होते हैं। यहाँ निष्कर्ष यही निकलता है कि शुभ व पाप ग्रह यदि त्रिकोणेश हो तो शुभद और त्रिषडायेश हो, तो अशुभद ही होंगे। यदि दो राशियों के स्वामी ग्रह त्रिषडायेश और त्रिकोणेश भी हो, तो भी वह पापफलद ही माने जाते हैं।

डॉ० युधिष्ठिर कुमार
सहा० प्राचार्य (ज्योतिष)
रा० उ० सं० महावि० सुखसेना,
पूर्णियाँ